क्रम सं०

प्रवेश सं० १८१९५ विषयः पुराणेतिहासम्

ग्रन्थकार

नाम नारायणवर्मोपदेशः। (षष्ठस्कन्धेऽष्टमोऽध्यायः)

पत्र सं० १-३.

अक्षर सं० (पंक्तौ) २२ पंक्ति सं० (पृष्ठे) ६e

श्लोक सं०

आकार: ९.५" x ४.५" लिपि: दे॰ना. आधार: का.

14502 सं. १९१७.

वि० विवरणम् पू०

पी० एस० यू० पा०—७७ एम० सी० ई०—१९५१—५० ०००

ने. ३७८७

Indira Gandhi National
Centre for the Arts

महीधरसंग्रहे - ५७५

टओवाक्य॥

॥श्रीगणेशाय नमः॥ यया गुप्तः सहस्राक्षः सवाहान् रिपुसैन्यकान्॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं॥१॥ भगवंस्त
न्ममाख्याहि वर्म नारायणात्मकम्॥ यथातताइनः शत्रून्येन गुप्तोंजयन्मृधे॥२॥ श्रीशुक उवाच॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानु
पृच्छते॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु॥३॥ विश्वरूप उवाच॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्
मुखः॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः॥४॥ नारायणपरं वर्म सन्नह्येद्भय आगते॥ दैवभूतात्मकर्मभ्यो ना
रायणमयः पुमान्॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्॥५॥ ओं नमो
नारायणायेति विपर्ययमथापि वा॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया॥६॥ प्रणवादियकारांतमंगुल्यंगुष्ठप
र्वसु॥ न्यसेद्धृदय ओंकारं विकारमनु मूर्द्धनि॥७॥ षकारं तु भ्रुवोर्मध्ये णकारं तु शिखया दिशेत्॥ वेकारं नेत्रयोर्युंज्यान्नका
रं सर्वसंधिषु॥८॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः॥ सविसर्गं फडंतं तत्सर्वदिक्षु विनिर्दिशेत्॥
॥९॥ ओं विष्णवे नम इति॥ आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतं॥ विद्यातेजस्तपोमूर्तिमिमं मंत्र

Indira Gandhi National
Centre for the Arts

मुदाहरेत्॥१२॥हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे॥दरारिचर्मासिगदेषुचा
१ पपाशान्दधानोष्टगुणोष्टबाहुः॥१३॥जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात्॥स्थलेषु
मायाबटुवामनोव्यात्त्रिविक्रमः खेवतु विश्वरूपः॥१४॥दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोसुरयू
थपारिः॥विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः॥१५॥रक्षत्वसौ माध्वनि यज्ञ
दं। कल्पः स्वदंष्ट्रयोन्नीतधरो वराहः॥रामोद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोस्मान्॥१६॥
मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात्॥दत्तस्त्वयोगादथ योगनाथः पाया
द्गुणेशः कपिलः कर्मबंधात्॥१७॥सनत्कुमारोवतु कामदेवाद्धयशीर्षा मां पथि देवहेलना
त्॥देवर्षिवर्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात्॥१८॥धन्वंतरिर्भगवान्पात्व २
पथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा॥यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशा

द्धीद्रः॥१९॥द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाषंडगणात्प्रमादात्॥कल्किः कले
कालमलात्प्रपातु धर्मावनायोरुकृतावतारः॥२०॥मां केशवो गदया प्रातरव्याद्गोविं
द आसंगवमात्तवेणुः॥नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः॥२१॥देवो
पराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां॥दोषे हृषीकेश उतार्धरात्रे निशीथ
एकोवतु पद्मनाभः॥२२॥श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोसिधरो जना
र्दनः॥दामोदरोव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः॥२३॥चक्रं
ना युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तं दंदग्ध्यरिसैन्यमाशु कक्षं यथा दंदग्धि
वातसखो हुताशः॥२४॥गदेशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि
॥कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन्॥२५॥त्वं यातुधा

Indira Gandhi National
Centre for the Arts

||नारा०|| नप्रथमप्रेमतमातृपिशाचविग्रहघोरदृष्टीन्।।दरेन्द्र विद्रावय कृष्णपूरि
||२|| तो भीमस्वनोरेर्हृदयानि कंपयन्।।२५।।तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम
छिंधि छिंधि।।चक्षूंषि चर्मञ्छतचंद्र छादय द्विषामघोनां हर पापचक्षुषां।।२६।।
नु यन्नो भयं ग्रहेभ्योभूत्केतुभ्यो नृभ्य एव च।।सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंहोभ्य एव वा।। भय
||२७|| सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्।।प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीप
काः।।२८।।गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः।।रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः
स्वनामभिः।।२९।।सर्वापद्भ्यो हरेर्नामरूपयानायुधानि च।।बुद्धींद्रियमनःप्राणान्पांतु
पार्षदभूषणाः।।३०।।यथा हि भगवानेव वस्तुतः सदसच्च यत्।।सत्येनानेन नः ||२||
सर्वे यांतु नाशमुपद्रवाः।।३१।।यथैकात्म्यानुभावनां विकल्परहितः स्वयं।।भूषणा

युधलिंगाख्या धत्ते शक्तीः स्वमायया।।३२।।तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः।।पातु सर्वैः
पे२ स्वरूपैर्नः सदा सर्वत्र सर्वगः।।३३।।विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः।।प्र
हापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः।।३४।।मघवन्निदमाख्यातं वर्म नारा
यणात्मकं।।विजेष्यस्यंजसा येन दंशितोसुरयूथपान्।।३५।।एतद्धारयमाणस्तु यं यं
पश्यति चक्षुषा।।पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते।।३६।।न कुतश्चिद्भयं तस्य
विद्यां धारयतो भवेत्।।राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्।।
इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः।।योगधारणया स्वांगं जहौ
स मरुधन्वनि।।३७।।तस्योपरि विमानेन गंधर्वपतिरेकदा।।ययौ चित्ररथः स्त्री
भिर्वृतो यत्र द्विजक्षयः।।३८।।गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः।।

सद्गुनान्य

स

Indira Gandhi National
Centre for the Arts

३ सबालखिल्यवचनान्नास्थीन्यादायविस्मित:॥३९॥प्रास्य प्राचीसरस्वत्यांस्ना
त्वाधामस्वमन्वगात॥यइदंश्रृणुयात्कालेयोधारयतिचादृत॥४०॥तंन
मस्यंतिभूतानिमुच्यतेसर्वतोभयात॥श्रीशुकउवाच॥एतांविद्यामधिगतोविश्व
रूपाच्छतक्रतु:॥त्रैलोक्यलक्ष्मींबुभुजेविनिर्जित्यमृधेसुरान॥४१॥इतिश्री
भगवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांपारमहंस्यांवैयासिक्यांषष्ठस्कंधे
नारायणवर्मोपदेशोनामाष्टमोध्याय:॥संपूर्ण:॥श्री॥आद्रावदी१७गुरुवार८७॥

Indira Gandhi National
Centre for the Arts